रूपं विन्द्याजितं तावत्पौ विवस्वानेव चक्षुषेश्वरः । नलिनीनालिनीनासे गंधः सौरभ्य उच्यते ।११। घ्राणो
ऽवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः । आपणो व्यवहारोत्र विक्रमे धौव हूदनं ।१२। पितृ
हूर्दक्षिणः कर्णः उत्तरो देवहूः स्मृतः । प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञितं । पितृयानं देव
यानं श्रोत्राच्छ्रुतधराद्व्रजेत् ।१३। आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः । उपस्थो दुर्
मदः प्रोक्तो निर्ऋतिर्गुद उच्यते ।१४। वैशसं नरकं पायुर्लुब्धकौ धौतु मे श्रृणु । हस्तपादौ
पुमांस्ताभ्यां युक्तो याति करोति च ।१५। अन्तःपुरं च हृदयं विषूचिर्मन उच्यते । तत्र मोहं प्र
सादं वा हर्षं प्राप्नोति तद्गुणैः ।१६। यथा बुद्धिः विक्रियते गुणाक्तो विकरोति वा तथा तथोपद्र
ष्टात्मा तद्वृत्तीरनुकार्यते ।१७। तद्गुणैः मनोगुणैः तमः सत्वरजोभिः महिषी यद्यदीहेत
विषूचीनपदार्थानुवादो विषूचिरिति । विक्रियते आत्मा प्रति विकरोति वा । इंद्रियाणि परिण
इत्यादेरर्थसंग्रहस्याह ।१८। यथा यथा बुद्धिः स्वप्ने विक्रियते वृत्तीः दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैव सन्नवलो
कयतीति तस्या गुणै रक्तो लिप्त आत्मा तथा तथा तस्या वृत्तीः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चची
१२१

संवत्सरस्यैवाप्रतिहतो वेगः प्रतीतो यस्य स संवत्सररजः वस्तुतस्तु अगतिः स्वस्वशरीरादेर्वु
द्धावेव वितर्केन देशांतरगत्यभावात् पाठांतरे संवत्सरश्चतत्कृतं वयश्चयतास्यगतिर्यस्येति। ह्रीवमित्य
स्य व्याख्या। त्रिगुणध्वज इति त्रिविगुणपदव्याख्या। पंचग्रहरणमित्येतद्व्याचष्टे। पंचेंद्रियार्थप्रदेपइति।
॥ पंचेंद्रियैः सूनाविनोदमिवान्याजेन विषजसेवां करोतीति पंचसूनाविनोदकृत्। अनेन च
देहो रथस्त्विंद्रियाण्यश्वः संवत्सररजोगतिः। द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुर्वेधुरः ॥१८॥ मनो
रश्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूवरः। पंचेंद्रियार्थप्रक्षेपसप्तधातुवरूथकः ॥ आकूतिर्वि
क्रमो वाह्यो मृगतृष्णां प्रधावति। २० एकादशेंद्रियचमूः पंचसूनाविनोदकृत्। संवत्सरश्च
डवेगः कालायेनोपलक्षितः ॥ २१॥ तस्याहानीह गंधर्वा गंधर्व्यो रात्रयः स्मृताः। हरंत्यायुः प
रिक्रांत्या षष्ट्युत्तरशतत्रयं ॥ २२॥ कालकन्या जरा साक्षाल्लोकस्तां नाभिनंदति। स्वसारं
जगृहे मृत्युः क्षयाय यवनेश्वरः ॥ २३॥ आधयो व्याधयस्तस्य सैनिका यवनाश्चराः। भूतो
पसर्गाशुरजः प्रज्वारो द्विविधो ज्वरः ॥ २४॥ १२१

वारमृगजातत्रेति व्याख्यातं। ॥ परिक्रांत्या परिभ्रमणेन। ॥ भगिनीत्वेन मृत्युः जरां जगृहे। मृ
त्युर्जनानां मरणदः तत्र जरा सहायकारिणीत्यर्थः। ॥ चराः संचारिणः भूतानामुपसर्गैः पीडायां
आशुशीघ्रं मृत्युहेतुः रजो वेगो यस्य। प्रज्वारस्येति प्रशब्दव्याख्या। पाठांतरे भूतकृताः अरजः अ
नेन च परिज्ञिकपक्षद्वैध इत्यादि पदं व्याख्यातं द्विविधः शीतोष्णरूपेण प्रवेशभेदात्। एवं परोक्षत्वेनो
क्तमर्थं व्याख्याय सर्वकथातात्पर्यमाह एवमित्यादि विरमक्रमेणेत्यंतेन। ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आधिदैविकादिभिर्दुःखैः क्लिश्यमानो ममाहमिति वर्षशतं देहे देही जीवोऽज्ञः शेते वर्त्तत इति द्वयोर
न्वयः ॥छ॥ अशनापिपासादीन् प्राणधर्मान् कामक्रोधादीन् मनोधर्मान् अनिर्गुणोपि आत्मन्यध्यस्य
कामलवान् विषयसुखलेशान् ध्यायन् कर्मकृत् ततः किं अत आह जायत इति द्वाभ्यां ॥छ॥ स्वदृक् स्वप्र
काशस्वरूपोपि ॥छ॥ शुक्लं सात्त्विकं कृष्णं तामसं लोहितं राजसं । यथाकर्म तथा जायते तद्देवादि ॥

एवं बहुविधैर्दुःखैर्दैवभूतात्मभिर्भृशं । क्लिश्यमानो वर्षशतं देहे देही तमोवृतः ॥ २५ ॥ प्राणेंद्रि
यमनोधर्मानात्मन्यध्यस्य निर्गुणः । शेते कामलवान् ध्यायन् ममाहमिति कर्मकृत् ॥ २६ ॥ य
दात्मानमविज्ञाय भगवंतं परं गुरुं । पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥ २७ ॥ गुणाभि
मानी स तदा कर्माणि कुरुतेऽवशः । शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते ॥ २८ ॥ शुक्लात्प्र
काशभूयिष्ठान् लोकानाप्नोति कर्हिचित् । दुःखोदर्कान् क्रियायासांस्तमःशोकोत्कटान् क्व
चित् ॥ २९ ॥ क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमंधधीः । देवो मनुष्यस्तिर्यग्वा यथाकर्मगु
णं भवः ॥ ३० ॥

शुक्लादिति द्वाभ्यां ॥छ॥ प्रकाशभूयिष्ठान् येषु लोकेषु । दुःखमुदर्क उत्तरं फलं येषु । क्रियाया
आयासो येषु तान् लोकान् तमःशोकः उत्कटो येषु । तान् कृष्णानिति ज्ञेयं ॥छ॥ नोभयं नपुं
सकं । यथाकर्मगुणं कर्मगुणानुसारेण देववशेन सुखदुःखं प्राप्नोतीति सदृष्टान्तमाह । नतिक्रमस्य ॥छ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्कं· क्षुधापरीतो व्याघ्रः सारमेयः श्वा दंडं लकुटप्रहारं ओदनं अन्नं वा प्राप्नोतीति यथा ॥टी॥ कामव्या
१२२ घ्रआशाजीयस्या ननु तर्हि सुखस्य अनवात् दुःखस्य च प्रतीकारस्य अनवात् नैकांततो हि यत्वं तत्रा
हदुःखे च स्थितिः ॥टी॥ दुःखस्य प्रतीकारस्तावन्नास्ति यस्माद्येतस्य तस्य प्रतिक्रियात तथापि त्रिविधे
षु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति ॥ प्रतिक्रियाणामपि दुःखरूपत्वा

क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहं ॥ चरन्न विंदति यष्टिं संदंडमोदनमेव वा ॥२१॥ तथा
कामाशयोऽतीवहन्भावान्वयथात्तमनः। उपर्यधो वा मध्ये वा यातिदिक्षु प्रियाप्रियं ॥२२॥ दुः
खे त्वेकतरेणापि दैवभूतात्महेतुषु। जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया ॥२३॥ य
थाहि पुरुषो भारं शिरसा गुरुमुद्वहन्। तं स्कंधेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ॥२४॥
नैकांततः प्रतीकारः कर्मणां कर्म केवलं। द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥२५॥ १२२

दितिमदृष्टांतमाह ॥टी॥ दुःखस्य मूलभूतानि तु कर्माणि प्रतिक्रियादिकर्मत्तिर्नैव निवर्तंत इत्याह ॥
॥टी॥ नैकांततः अत्यंतं सर्वात्मना नं केवलं ज्ञानरहितं अविद्ययाउपसृतं व्याप्तं अतो न विरोधान्न नि
वर्तकत्वमिति भावः ॥ अत्र दृष्टांतः स्वप्ने दुःस्वप्नः प्रबोधं विना यथा तं स्वप्नं सत्यं तन प्रकरो
तीत्यर्थः ॥ ननु तर्हि ज्ञानविजृंभितत्वेन संसृतिहेतोर्देहादेरप्यसत्त्वात् किं तन्निवर्तनप्रयासेन
त्याह ॥टी॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लिंगरूपेणउपाधिभूतेनमनसा। तदेवंसंसृतिप्रकारमुक्त्वातन्निवृत्तिप्रकारमाह। ॥ढ॥ अथतस्मा
त्प्रकारद्वयार्थभूतस्येतोनर्थपरंपरावात्मनः यतोऽज्ञानान्मनसोवाऽनर्थपरंपरारूपासं
सृतिर्भवति। तस्याःव्यवच्छेदोगुरुरूपेवासुदेवेभक्त्यैवभवति। ननुसंसृतिनिवृत्तिःवैराग्यपूर्वकात्
ज्ञानादेवनतुभक्त्या। तरतिशोकमात्मविदितिश्रुतेः। तत्राह। ॥ढ॥ सध्रीचीनेनसमीचीनेनप्रकारेण।
अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते। मनसालिंगरूपेणस्वप्नेविचरतोयथा ॥३६॥ अथात्म
नोर्थभूतस्ययतोनर्थपरंपरा। संसृतिस्तद्व्यवच्छेदोभक्त्यापरमयागुरौ ॥३७॥ वासुदेवेभगव
तिभक्तियोगःसमाहितः। सध्रीचीनेनवैराग्यंज्ञानंचजनयिष्यति। ॥३८॥ सोचिरादेवराजर्षेस्यादच्
युतकथाश्रयः। शृण्वतःश्रद्दधानस्यनित्यदास्यादधीयतः ॥३९॥ यत्रभागवताराजन्साधवो
विशदाशयाः। भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥४०॥

नन्वसौमहाफलोभक्तियोगःकथंस्यादतआह। ॥ढ॥ सतुअच्युतकथाश्रयत्ववर्त्तमानोविरागत्वा
त्। कस्यस्यात्। तदाह। शृण्वतः। अधीयानस्य। कुत्रस्यात्तदाह। ॥ढ॥ भगवतोगुणानुकथनेश्रव
णेचव्यग्रंप्रवरंचेतोयेषांते। ननुसाधुसंगंविनास्वगृहमेवहरिकथाचिंतनादिनाभक्तिर्भवेदि
त्यत्रशंकायांतदाह। ॥ढ॥

च.टी. १२२ तस्मिन्स्थानेमहद्भिर्मुखरिता:मधुभिच्चरित्रमेवपीयूषंतदेवशेषस्तद्वतिशेषोयासुअसारांशरहि
तसुधाम्रतवाहिन्यइत्यर्थः।अस्मिन्नेषःअलंबुद्धिःशून्याःसंतःगाढैःसावधानैःकर्णैर्येताःसरितः
पिबंतिसेवंतेएतान्नशत्रुक्षुत्तृट्दुःखादयःनान्नस्पृशंति।तत्त्विकास्तिकान्नवाधंतइत्यर्थः॥
सत्संगमंतरेणस्वजमेवकथाचिन्तनादावालस्यादिनारस्ताविशान्नावाद्यचतुत्तिपास्माद्यज्जिन्हूतस्य

तस्मिन्महन्मुखरितामधुभिच्चरित्रपीयूषशेषसरितःपरितःस्रवंति।तायेपिबंत्यवितृषो
नृपगाढकर्णैस्तान्नस्पृशंत्यशनतृड्भयशोकमोहाः।४१॥ एतैरुपद्रुतोनित्यंजीवलोकःस्व
भावजैः।नकरोतिहरेर्नूनंकथामृतनिधौरतिं।४२। प्रजापतिपतिःसाक्षाद्भगवान्गिरिशो
मनुः।दक्षादयःप्रजाध्यक्षानैष्ठिकाःसनकादयः।४३। मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहः
क्रतुः।भृगुर्वसिष्ठइत्येतेमदंताब्रह्मवादिनः।४४। अद्यापिवाचस्पतयःतपोविद्यासमाधि
भिः।पश्यंतोपिनपश्यंतिपश्यंतंपरमेश्वरं॥४५॥ १२२

तत्किर्नसंभवतीत्याह। भगवदनुग्रहमंतरेणतुनकस्यापिज्ञानसंभवइतिकेमुत्यन्यायेनाह।
चतुर्भिः। प्रजापतिपतिर्ब्रह्मा। मदंताः अहमेवनारदांतेयेषांते।वाचांपतयोपितपोविद्या
समाधिनिरूपाये:पश्यंतोपिविविन्वंतोपिपश्यंतंसर्वस्यसाक्षिणंनपश्यंतिकुतइत्यतआह।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शब्दब्रह्मणि दुःपारे चरंत उरुविस्तरे अर्थतोऽपि पारशून्ये। तस्मिन्वर्त्तमानानां मंत्राणां लिंगैः वज्रहस्तत्वादिगुणयुक्तविविधदेवताभिधानसामर्थ्यैः परिछिन्नमेवेंद्रादिरूपं तत्तत्कर्माग्रहेण भजंतः परमेश्वरं न विदुः तर्हि स्वल्पः कोनाम कर्माग्रहं हित्वा परमेश्वरं एव भजेदत आह।४६। यदा यमनुगृह्णाति अनुग्रहहेतुः आत्मनि भावितः आत्मत्वेन ज्ञातः स तदा लोके लोकव्यवहारे वेदे च कर्ममार्गे परिनिष्ठितां मतिं त्यजति।४७। अर्थकाशिषु परमार्थत्वेन प्रकाशमानेषु पुरुषार्थबुद्धिं मा कृथाः। प्ररोचनायकेव

शब्दब्रह्मणि दुःपारे चरंत उरुविस्तरे। मंत्रलिंगैर्व्यवछिन्नं भजंतो न विदुः परं।४६। यदा यम
नुगृह्णाति भगवानात्मभावितः। स जहाति मतिं लोके वेदे च परिनिष्ठितां।४७। तस्मात्कर्मसु बर्हि
ष्मन्नज्ञानादर्थकाशिषु। मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु।४८। स्वं लोकं न वि
दुस्ते वै यत्र देवो जनार्द्दनः। आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः।४९। आस्तीर्य दर्भैः प्राग
ग्रैः कार्त्स्न्येन क्षितिमंडलं। स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परं।५०।

लं श्रोत्रस्पर्शिषु न स्पृष्टं वस्तु यैः। ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति। कथमस्पृष्टवस्तुषु इत्युच्यते तत्राह स्वं लोकमिति।४९। ये धूम्रधियो मलिनबुद्धयः सकर्मकं कर्मपरं वेदमाहुः। ते अतद्विदः न वेदज्ञाः यतस्ते स्वं स्वरूपभूतं लोकं आत्मतत्त्वं वेदतात्पर्यगोचरं न विदुः। यत्र देवोऽस्ति येनु महामूर्खेद्वृत्याह।५०। बृहद्वधात् बहुपशुवधात् मानी महायज्वाहमित्यहंकारी। अतस्तब्धः अविनीतः सन् कर्म नावैषि। परं विद्यास्वरूपं तद्यन्न वेत्सि। नारदः स्वयं रूपयातत्रूढजं निरूपयति।५०।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बन्धी हरितोषजतीतिहरितोषंयत्तत्देवकर्मयज्ञातस्मिन्स्यैरोमतिर्जवतिसैवविद्या॥महाफलत्वान्नांकुत
२२४ इत्यपेक्षायांहरेःपरमफलंदर्शयति।हरिरितिहरिर्देहभृतामात्माईश्वरस्वतन्त्रहेतुःस्वजंस्वातंत्र्ये
णप्रकृतिःकारणंअतस्तेषांतत्पादमूलमेवशरणंकस्माज्जःयतः।तस्मिन्नूनवलङ्घजनेऽस्यन्नजनइ
वङ्कःस्वंतर्जयेत्याह।॥४९॥भवाङ्गति॥इतियोविदसएवविद्वान्स्मगुरुरेवहरिश्चतत्क्रमुपपन्नंहरतिप्रश्न
इति॥५०॥एवंभगवतःप्रश्नाःसंछिन्नाःपरिहृताः।नदेवमात्मनोवंधमोक्षप्रकारःकृपात्रूपेणकथि
तत्कर्महरितोषंयत्तस्याविद्यातन्मतिर्यया।हरिर्देहभृतामात्मास्वजंप्रकृतिरीश्वरः॥तत्पाद
मूलंशरणंयतःक्षेमोनृणामिह॥५१॥सर्वेप्रेस्तमष्यात्मायतोनन्तजमन्वपि।इतिवेदस्वैवेवि
द्वान्योविद्वान्सगुरुर्हरिः॥५२॥नारदउवाच॥प्रश्नएवंत्निंतछिन्नोभवतःपुरुषर्षभ।अत्र
मेवदतोगुह्यंनिशामयस्तुनिश्चितं॥५३॥तुडङ्गवरंस्तुमनसांशरणेमिथिथ्यारक्तंषडंङ्घ्रिगणस्या
मस्तुलुब्धकर्णी।अग्रेवृकानस्तुतपोविगणय्यजांतेएणमृगंमृगजलुब्धकवाणभिन्नं॥५४॥ २२४
तोपिनातिनिर्विसंवित्तंपुत्रागामनंप्रतीक्षमाणंमंतंतत्विप्रमिवमहात्तजप्रकंपितसकलगात्रंगृह 125
न्निर्वमपजितुंहरिणत्पकमाह॥अत्रेति॥वदतोमेगुह्यंवचःशृणु॥५५॥तुडमत्यंवरलीतितथातं।अ
लुकःस्तुमनसांपुष्पाणांशरणेआश्रयेवाटिकायांमिथिवामिथःपरस्परंस्त्रिजाम्पहमिलित्वात
त्रैवरक्तंआसक्तंषडंङ्घ्रयोभ्रमरास्तेषांगणस्तेषांमस्तुमस्तुगीतेषुलुब्धःकर्णोयस्यतंपरेषाम
मुत्तिर्हतेःस्वीजान्अग्रतःपुरतःप्रजतीतिअस्तुत्रिपःतानविगणय्यअगणइव्यालुब्धकस्पवाणेन
भिन्नंमृगंमृगजअन्वेषजश्नोकंप्रस्तुतंयोजयन्व्याचष्टे॥५६॥सुमनसमु॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

= धर्माणांस्त्रीणांशरणआश्रमेपुष्पमधुगंधवत्क्षुद्रतमंकाम्यकर्मविपाकजंकामसुखलवंजिह्वो
पस्थादिविचिन्वंतंमिथुनीभूयतच्चित्तनिवेशितमनसंषडंघ्रिगणसामगीतवदतिमनोहरवनितादिज
नालापेष्वतितरामतिप्रलोभितकर्णमूलमग्रेवृकयूथवत्आत्मनःआयुर्हरतोहोरात्रांतान्काल
विशेषान्अविगणय्यगृहेषुविहरंतंपृष्ठतएवपरोक्षमनुप्रवृत्तोलुब्धकःकृतांतोंतःशरेणयमिह
पराविध्यति।ममिममात्मानमहोराजन्भिन्नहृदयंद्रष्टुमर्हसीति।।छ।।सुमनोभिःसमानोधर्मःप
रिणामविरसत्वंयासांतासांस्त्रीणां।मिथित्वेत्यस्यव्याख्या।मिथुनीभूयस्त्रीभिःसहेतिशेषः।रक्तमित्य
स्यव्याख्याः।तास्वचित्तनिवेशितमनोयेन।अग्रेसुतृपइत्यस्यव्याख्या।आयुर्हरतेति।यांतमित्यस्यव्या
ख्याविहरंतमिति।।छ।।

सत्वंविचक्ष्वमृगचेष्टितमात्मनोंतश्चित्तंनियच्छहृदिकर्णधुनींचचित्ते।जह्यंगनाश्रममस
त्तमयूथगाथंप्रीणीहिहंसशरणंविरमक्रमेण।।५६।।राजोवाच।।श्रुतमन्वीक्षितंब्रह्मन्
भगवान्यदभाषत।नैतज्जानंत्युपाध्यायाःकिन्नब्रूयुर्विदुर्यदि।।५७।।

विचक्ष्वविचारयअंतर्हृदिचित्तंकर्णयोधुनींनदीमिवबहिर्वृत्तिंचित्तेनियच्छ।एतच्चसर्वेंद्रियोपलक्ष
णार्थं।गृहाश्रममेवजहिकिंविशिष्टमाश्रमं।असत्तमानांरतिकामुकानियमानियूथानितेषांगाथावार्ता
यस्मिन्।जीवानांशरणंईश्वरं।एवंक्रमेणसर्वतोविरमस्व।अर्थांतरंप्रष्टुंपूर्वोक्तार्थमनुवदति।छ।।श्रु
तमन्वीक्षितेविचारितं।ब्रह्मन्नारदएतत्तद्भक्तमात्मतत्वंउपाध्यायाजेयेममकर्मोपदेष्टारःआ
चार्यास्तेनजानंति।।छ।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

च०टी अतस्तत्त्वज्ञानरूपाग्निना तत्कृतः उपाध्यासकृतः संदेहः छिन्नः। तद्भावस्य विरोधेन आत्मतत्त्वे असंभाव
१२५ नात्मरूपो महानस्ते संशयः छिन्नस्त्वया। अत्रानुकाश्चित्संशयो वर्त्तते। यत्रेदं दृश्यदृश्यानामप्रवृत्तेर्मुक्ति
तिः संशयमाह द्वाभ्यां। ५७॥ कर्माणि येन देहेन करोति। तमत्रैव विहाय अमुत्र परलोके कर्मोपभोगाय अपि
तेन अन्येन देहेन जुष्टानि तत्फलानि जीवः अश्नुते प्राप्नोति। इति वादः श्रूयते। प्राप्य पुण्यकृतां

संशयोऽन्न नु मे विद्वन् संछिन्नस्त्वत्कृतो महान्। ऋषयोपि हि मुह्यन्ति यत्र नैकद्विजद्विजाः।
५८ कर्माण्यार्जते येन पुमानिह विहायते। अमुत्रान्येन देहेन जुष्टानि स यदश्नुते। ५९॥ इ
ति वेदविदां वादः श्रूयते तत्र तत्र ह। कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते। ६०॥

लोकान् इति शरीरजैः कर्मदोषैर्यान्ति स्थावरतां नर इति। वचनावोक्तं। शाश्वतीरनुत्तमाः समा इति। ए १२५ 125
तस्य कर्त्तृलोकदेहजन्ये देहनाशे कृतनाशाकृताभ्यागमप्रसंगात् न संगच्छते इति भावः। संशयान्तरमाह
इतीति। ६१॥ प्रोक्तं वेदोक्तं कर्म क्रियते जनैः। तच्च निरन्तरक्षण एव परोक्षं अदृश्यं सन्न प्रकाशते॥
अतः कर्मणो न स्यात् तज्ज्ञो योपि दुर्घट इति भावः। प्रथमप्रश्नोत्तरमाह॥ ६२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अव्यवधानेनकर्तृत्वोक्तःदेह।वेच्छेदंविनास्थूलदेहनाशेऽपिमनःप्रधानस्यलिंगदेहस्यत्वनाशात्।नो
क्तदोषप्रसंगात् त्यर्थः।लिंगदेहः विशिष्टस्यतेनोक्तंचंस्वप्नदृष्टांतेनस्यसृजति।७।शयानमिमेजा
ग्रद्देहंस्थमंतंजीवंतंउत्सृज्यतदाज्ञिमानत्पस्का आत्मनिमनसिसंस्काररूपेणआहितंकर्मयथाभुं
क्ते।तादृशेनशयानदेहसदृशेनकर्मणोपस्थापितेनदेहेनान्येनपश्वादिदेहेनवा।तथालोकांतरेपीति
भावः।ननुतर्हिवतुनामलिंगविशिष्टस्यापानेनदृष्टांतेननोक्तंयंकर्तृत्वंतुदानप्रतिग्रहादिषुस्थूलदे
नारदउवाच।येनैवारभतेकर्मतेनैवामुत्रतत्पु मान्।भुंक्तेह्यव्यवधानेनलिंगेनमनसास्व
यं।५८।शयानमिममुत्सृज्यश्वसंतंपुरुषोयथा।कर्मात्मन्याहितंभुंक्तेतादृशेनेतरेणवा।८।
ममैतेमनसायद्यदसावहमितिब्रुवन्।गृह्णीयात्तत्पुमान्राद्धंकर्मयेनपुनर्भवः।९।

द्विशिष्टस्यैवदृश्यतेतत्राह।७। ममैतेपुत्रादयः अस्यावहंब्राह्मणइतिब्रुवन्मनसायद्यदे
गृह्णीयात्तत्तदा देहानुराद्धंस्पष्टिद्धंकर्मपुमान्गृह्णीयात्येनकर्मणाएवमहंकारगृहीतेनपुनर्भ
वोभवति।अन्यथाजन्मानुपपत्तेः।इतोअत्तिमंतुर्मनोविशिष्टस्यैवकर्तृत्वंअत्तिमानविषयस्यतुदे
हस्यपुत्रादिहवधारमात्रत्वमितिभावः।यद्वाकंकर्मणोनश्वरत्वात्नामुत्रभोगइतितत्राह।।७। ।।

१०/री उत्पत्तेर्ज्ञानकर्मेन्द्रियैः दूरं द्रियाणामीहितैः कदाचित्कर्मप्रवृत्तिभिः चित्तमनुमीयते मत्पयिस्मैर्वा द्विजविषयसं
२६ बंधे युगपत्ज्ञानानुपपत्तेः तदुक्तं न्यायात्तेन युगपत्ज्ञानानुत्पत्तिर्मनसो लिंगमिति एवं चित्तवृत्तिभिर
पि पूर्वदेहजं कर्मैलक्ष्यते। तासामपि युगपदनुत्पत्तेः ततोपि कर्मैलक्ष्यत इत्याह। नानुभूतमिति द्वाभ्यां।
।६०। अनेन वर्त्तमानेन देहेन क्वचकुत्रचिदपि यन्नानुभूतं अनुपभुक्तं अदृष्टं वाश्रुतं च यद्रूपं यदात्मकं
यादृक् यत्प्रकारं स्वतत्कदाचित्स्वप्नमनोरथादिषु आत्मनि मनसि उपलभ्येत ।६१। तेन हेतुना अस्य
यथानुमीयते चित्तमुत्पत्तेरिंद्रियेहितैः। एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ।६२। नानुभू
तं क्वचानेन देहेनादृष्टमश्रुतं। कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ।६३। तेनास्य तादृशं रा
जन् लिंगिनो देहसंभवं। श्रद्धस्वाननुभूतोर्थो न मनः स्प्रष्टुमर्हति ।६४। मनएव मनुष्यस्य पू
र्वरूपाणि संसति। नविष्यदतश्च तद्वेत्ते तथैव न नविष्यतः। ।६५। १२६

लिंगिनो वासनाश्रयस्य जीवस्य तादृशं तदनुभवादिषु भुक्तं पूर्वदेहसंभवं श्रद्धस्व निश्चयेन म 121
न्यस्व। न स्यननुभूतोर्थो मनस्प्रष्टुं मनस्तस्फुरितुमर्हति। किंच मनो वृत्तेव पूर्वापराणि भुक्ता भुक्त
निमित्तानि शरीराणि ज्ञायंत इत्याह।। ।६६। नड्डंत इति सम्यगवधानार्थमाशिषा। तिनंदति। नविष्य
तः उद्भवं प्राप्स्यतः न नविष्यतः नीचत्वं प्राप्स्यतो ताचीनि रूपाणि शंसति। मन एवैतादार्यकार्याण्या
दिवृत्तिभिः पूर्वमध्ये वा मनः पश्चादप्येवमेव नविष्यंतीति ज्ञापयतीत्यर्थः। ननु कदाचिदृष्टं निान
ष्टमपि स्वप्ने प्रतीयते। यथा पर्वताग्रे समुद्रादिवा नक्षत्राणि। स्वशिरच्छेदइत्याह।। ।६७।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अन्यदेशाश्रयं पर्वतं ग्रे। पर्वतोपि हस्वः सागरोपि हस्वः तौ कदापि देकत्र स्थितौ पश्यति शास्त्रजं नन्द
नादिकं दिवा। अन्यगादिक्रियाश्रयं शिरश्छेदनाश्रयं निद्रादिदोषतो हि प्रतीयत इत्यनुमंतव्यं। पर
स्पात्तदनुपपत्तेस्तुल्यत्वादितिभावः। ननु दरिद्रः क्वचिदात्मानं महाराजं पश्यति। राजा वरकमात्मानं
पश्यति। तत्कथमसत्यत्वमिति संभावितेत्यत्राह। ६५। आजांतिनेगापचेन प्राप्नुवंति। यांति नेगानंतरं॥
यदि व कश्चिदमना न वेत्तु। तत्सर्वं नस्याद् न वेतदस्तीत्याह। सर्वस्य मनस इति। अतः सर्वेषां समनस्क
वात्मनापि वसर्वार्थानां क्रमेण प्रवेशनात्पताद्दृष्टगोचरः कस्यापि कश्चिदर्थोस्तीत्यर्थः। तदेवस्त
दृष्टमश्रुतं वात्र क्वचिन्मनसि दृश्यते। यथा तथानुमंतव्यं देशकालान्त्रिजाश्रयं ६६॥
सर्वक्रमानुरोधेन मनसी द्विजगोवराः। आजांति वर्षशोयांति सर्वस्य मनसो जनाः ६७॥ सत्त्वे
कनिष्ठे मनसि त्रिगावत्पार्श्ववर्तिनि। तमश्चंद्रमसी वेदमुपरज्यावत्तासते। ६८॥
वैरपि सर्वं। अर्थाः क्रमेण दृश्यत इत्युक्तं। इदानीं युगपदपि सर्वदर्शनं कदाकदाविद्भवतीत्याह॥
६९॥ सत्त्वैकनिष्ठे त्रिगावत्पार्श्ववर्तिनि त्रिगवध्यानपरे मनसि इदं विश्वं उपरज्य संयोगमेव प्राप्य अ
वतासते। प्रतीत्यनर्हस्यापि कदाचित्प्रतीतौ दृष्टांतः। चंद्रमसि उपरज्यतमः राहुरिवा। तदिदं शुद्धे
मनसि सर्वविषयस्फुरणं योगिप्रत्यक्षमिति प्रसिद्धं। तदेवं स्थूलदेहनाशेपि लिंगदेहस्यानाशात
अन्यः कर्ता अन्यो भोक्ता इति दोषो नास्तीत्युक्तं। तत्रैवं शंकते। ननु लिंगदेहस्य स्थूलदेहद्वारेणैव
कर्तृत्वं भोक्तृत्वं न तु केवलस्य। तत्र कदाचित्स्थूलदेहाभावे जीवस्य कर्तृत्वभोक्तृत्वाभावात् मुक्तिः

वरी
१२७

अहंममेतिभावः स्थूलदेहसंबंधः पुरुषे जीवेन व्यवधीयते। न विच्छिन्नो भवति। किं पर्यंतं सुषुप्त्या
दीनां व्यूहः परिणामो लिंगं यावदस्ति अनादिमान् अनादिः सन् स्वापादावहंकराभावानुत वि
च्छेदमात्रं व्याप्य सुषुप्तीति ध्वात्पा। ७॥ सुषुप्त्यादिषु उपतापः इष्टवियोगादिदुःखं तेषु अहमिति
ज्ञानं अहंकारः नेहते न प्रकाशते। घ्राणोन्मनानामिंद्रियाणां विघातात् इंद्रियैः इदंकारास्पद

नाहंममेतिभाविजः पुरुषे व्यवधीयते। यावद्बुद्धिमनोवृत्त्यर्थगुणव्यूहोऽस्त्यनादिमान्॥
सुप्तिमूर्छोपतापेषु घ्राणोन्मनविघाततः। नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥८॥ ग
र्भेवाल्येप्यपौष्कल्यात् एकादशविधं तदा लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो यथा ॥९॥

वस्तु अग्रहणेऽस्य अहंकारः स्फुरति। नान्यथेत्यर्थः। ८॥ गर्भे बाल्ये अपौष्कल्यात् असंपूर्णत्वात् प्रा १२७
णोन्मनानामिति शेषः। पुनस्तरुणस्य यदेकादशविधं एकादशेंद्रियैः स्फुटं लिंगमहंकरणं त 127
न्न दृश्यते सतोऽप्यनभिव्यक्तेः दृष्टांतः। कुह्वाममावास्यायां चंद्रमसो लिंगं रूपमिव तस्मादहं
कारास्पदस्य स्थूलदेहस्याविच्छेदात् वस्तुनः तार्थाभावेऽपि संसृतिनिवृत्तिर्नास्तीत्याह ॥९॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यावल्लिंगंस्थूलदेहाविछेदात्संसारानिवृत्तिरित्येतत्प्रपंचयतीतिएवमितिस्मोर्द्धैस्त्रिभिः ॥६९॥
पंचविधंपंचतन्मात्रात्मकंत्रिवृत्त्रिगुणंषोडशविकारात्मनाविस्तृतं एषसंघः ॥७०॥ नन्वेकंदेहं
विसृज्यदेहांतरप्रवेशात्पूर्वंविदेहतास्यादेवेत्याशंक्याह ॥७१॥ नोपयातिपूर्ववत्दृष्णस्य अत्यागा
अर्थेस्यविद्यमानेपिसंसृतिर्ननिवर्त्तते ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा ॥७२॥
एवंपंचविधंलिंगंत्रिवृत्षोडशविस्तृतं एषचेतनयायुक्तोजीवइत्यभिधीयते ॥७३॥ अनेन
पुरुषोदेहानुपादत्तेनमुंचति हर्षशोकंभयंदुःखंसुखंचानेनविंदति ॥७४॥ यथात्रिण
जलूकेयंनोपयात्यपयातिच नत्यजेन्म्रियमाणोपिप्राग्देहाभिमतिंजनः ॥७५॥ यावदन्यंन
विंदेतव्यवधानेनकर्मणां मनएवमनुष्येंद्रभूतानांभवभावनं ॥७६॥ यदाक्षैश्चरिताध्यान्
स्वकर्माण्याविनुतेसकृत् सतिकर्मण्यविद्यायांबंधःकर्मण्यनात्मनः ॥७७॥ अतस्तदपवादार्थं
भजसर्वात्मनाहरिं पश्यंस्तदात्मकंविश्वंस्थित्युत्पत्त्यप्ययायतः ॥७८॥
तदपयातिचत्रिणजलौकावदग्रधारणाद्यथातथानत्यजेत् ॥७९॥ अन्यदेहंकर्मणांप्राग्देहारंभकाणांव्यव
धानेनविछिदेनसमाप्त्या प्रकरणार्थमुपसंहरति मनएवेति भवभावनंसंसारहेतुः कथंसति ॥८०॥
तदाह चरितान्स्वकर्माणिइत्युपतः कर्माणिसति नन्वसंगस्यकुतःकर्मतत्राह अविद्यायांसत्यांत्र
नात्मनोदेहादेःकर्मणिबंधोनभवति ॥८१॥ विश्वस्यस्थित्यादयोयतस्तंहरिंभजेति
॥८२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

च०टी
१२८

हंसयोर्जीवेश्वरयोः। ८०। पुत्रानादिश्य पतिपुत्राणामादेशे मंत्रिणामन्येकथयजित्वा। कपिलाश्रमं गंगा
सागरसंगमे। ८०। एतन्मुकुंदयशसा। आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलदं। ८१।
मैत्रेय उवाच। भागवतमुख्यो भगवान्नारदो हंसयोर्गतिं। प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं त
तोगमत्। ८२। प्राचीनवर्हिः राजर्षिः प्रजासर्गाभिरक्षणे। आदिश्य पुत्रानगमत्तपसे कपिला
श्रमं। ८३। तत्रैकाग्रमना धीरो गोविंदचरणांबुजं। विमुक्तसंगोनुभजन्भक्त्या तत्साम्यतामगात्।
८४। एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ। यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते। ८५।
एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचं। यः कीर्त्यमानमधिगच्छति
पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबंधः। ८६। इदमध्यात्मपारोक्ष्यमिदं मयाधिगतम
द्भुतं। एवं स्त्रियाश्रमः पुंसः छिन्नोमुत्र च संशयः। ८७। इति श्रीभागवते महापुराणे चतुर्थ १२८
स्कंधे नारदप्राचीनवर्हिःसंवादे एकोनत्रिंशोध्यायः। २९। येत्वयाभिहिता ब्रह्मन्सुताः प्रा 129
चीनवर्हिषः। ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य कां। १। १ विदुर उवाच।

स्त्रीबुद्धिः तस्माद्धि तस्या अमोहंकारः छिन्नो भवति। अमुत्र कर्मफलभोगः कथमिति संशयः छि
न्नः। ८७। इति चतुर्थे एकोनत्रिंशः। २९। ॥ प्रसंगात्पंचभिः प्रोक्तं वृत्तं प्राचीनवर्हिषः। वर्ण्यते च पुनर्धान्यं
प्रस्तुतं तत्प्रचेतसां। १ तत्र त्रिंशे तपस्तुष्टान् ईशाल्लब्धवरास्ततः। आगत्य वार्क्षीमुद्वाह्य राज्यं चक्रुरि
तीर्यते। २ हरिं प्रतोष्य कां सिद्धिमापुः। ८०।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हेबार्हस्पत्यबृहस्पतेःशिष्यहेमैत्रेयजकस्याविधिधियायांबृहस्पतेर्मैत्रेयजःशिष्यइतिज्ञातव्यंते
प्रचेतसःयदृच्छयागिरिशंप्रसाद्यतस्यैवकैवल्यनाथप्रियस्यगिरिशस्यपार्श्ववर्त्तिनःतदनुगृ
हीताःसंतोनूनंपरंमोक्षंप्रापुरेवोततःपूर्वंतुइहअथवापरत्रकिंप्रापुःकथयेति ॥१॥ उद्रगी
तेजपयज्ञरूपेणयज्ञेशंतथातपसावपुरंजनंहरिं ॥१॥ तेषांकृच्छ्रंतपःक्लेशंतुवाकांत्पाशमजनरुशी
किंबार्हस्पत्येहपरत्रवाथकैवल्यनाथप्रियपार्श्ववर्त्तिनः॥ आसाद्यदेवंगिरिशंयदृच्छया
प्रापुःपरंनूनमथप्रचेतसः॥ २॥ मैत्रेयउवाच॥ ॥प्रचेतसोंतरुदधौपितुरादेशकारि
णः॥ जपयज्ञेनतपसापुरंजनमतोषयन्॥ ३॥ दशवर्षसहस्रांतेपुरुषस्तुसनातनः॥
तेषामाविरभूत्कृच्छ्रंशांतेनशमयन्रुचा॥ ४॥ सुपर्णस्कंधमारूढोमेरुशृंगमिवांबुदः॥
पीतवासामणिग्रीवःकुर्वन्वितिमिरादिशः॥ ५॥ काशिष्णुनाकनकवर्णविभूषणेनभ्रा
जत्कपोलवदनोविलसत्किरीटः॥ अष्टायुधैरनुचरैर्मुनिभिःसुरेंद्रैरासेवितोगरुडकिं
नरगीतकीर्त्तिः॥ ६॥

तेनसत्वेनवपुषाआविर्भूतः ॥४॥ सुपर्णस्कंधमारूढइत्यादिनावर्णितःसुतान्नाहेत्युतीजेनान्व
यः ॥५॥ कनकमयेनवर्णवताविभूषणेनभ्राजमानकपोलंवदनंयस्यसअष्टभिरायुधैर्गरुड
एवकिंनरःतेनयद्गानेगीताकीर्त्तिर्यस्य ॥६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

च.टी पीनाश्चतेत्र्प्राजतास्वत्र्प्रष्टौभुजास्तेषांमंडलंसमूहः तन्मध्येस्थितजालदम्पास्पर्द्धमानाश्रीःशोभा
१२९ यस्याःतजावनमालजापरिवृतः आद्यःपुरुषः आह्वापर्जन्यस्यनादइवकृतंनादोयस्याःतजावा
वास्यघृणोवलोकोयस्य। ६। यूजमेमन्तोवरंवृणीध्वंमौहार्द्दनहेतुनाऽपृथक्‌धर्मायेषांते
षांमंवो धनंवःपरस्परंसौहृददेनतुष्टाहे। ६। न्रतेषुसौहृदंदत्तविष्पति। ६। तेन्पादास्यो।किंपुनः
पीनाजतासुभुजमंडलम धघलदम्पास्पर्द्धेद्धिश्रापरिवृतोवनमालजाद्यः।वर्हिष्मतःपुरु
षत्र्प्राहस्तुतान्‌धपन्नान्‌पर्जन्यनादउतजास्तघृणावलोकः।७।श्रीभगवानुवाच॥ ॥
वरंवृणीध्वं नंदवोयूजंमेनृपनंदनाःसौहार्द्दनापृथक्‌धर्मानुष्टोहंसौहृदेनवः।८।
येनुस्मरतिसंध्यायांयुष्मानुदिनेनरः।तस्यत्र्भ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदं।
।९। येतुमांरुद्रगीतेनसायंप्रातःसमाहिताः।स्तुवंत्यस्तुंकामवरान्दास्येप्रज्ञांचशो
भनां। १०। यद्यूयंपितुरादेशमग्रहीष्टमुदान्विताः।अथेवउशतीकीर्त्तिर्लोकाननुभवि
ष्पति। ११। नविताविश्रुतःपुत्रोनवमोब्रह्मणोगुणैः।यएतामात्मवीर्येणत्रिलोकीपू
रयिष्यति। १२।
युष्मत्यामितिशेषः। ६। अग्राहिष्टगृहीतवंतः। अथोहेतोः लोकाननुलोकेषुभविष्पति।यद्वा
लोकाननुभविष्पतिइन्द्रपतिप्राप्स्यतीत्यर्थः। ६। आत्मनोवीर्येणसंतानेनत्रिलोकीपूरयिष्य
ति।पुत्रार्थमादेशोत्तार्यमंपादयतिकंडोरिति।त्रिभिः। ६। १२९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative
125

कंडोः अरिष्टेस्तपोनाशार्थं इंद्रेण प्रेषिताजाप्सरसौ प्रम्लोचा कंडुर्नाम ऋषिर्वहुकालं रेमे प्राव ततः स्वर्गं गच्छ
तीं कंडोर्जातां गर्भं तरु देषु त्यक्त्वा जगाम। तदेतदुक्तं। अपविद्धोत्पन्नौ। ११। सप्रम्लोचा वनस्पतीनां राजा
सोमः अमृतस्रावि णीदृष्टिं नीतां जनीं तुदं स्पर्शात्तस्या मुखे निदधौ अनेनाप्सरो गर्भस्य संजीवनामृतात्सुरे
णचतस्याः लावण्यं कमस्य वेदवेदांगं धमादिराहित्यं चोक्तं। १२। मामनुवर्त्तमानेन पित्रा नियुक्तः सं ततः तत्र
कंडोः प्रम्लोचायाः कन्या कमललोचना तां वापविद्धो जगृहु नृरुहा नृपनंदनाः। १३। तद्विद्या
यामुखे राजस्तोम पीयूषवर्षिणी। दर्शिनी राद्य मद्य नाथानि दधे सदजान्वितः। १४। प्रजानिसर्गेष्वा
दिष्टाः पित्रा मामनुवर्त्तता। तत्र कन्यां वरारोहां तामुद्वहत माचिरं। १५। अपृथग्धर्मशीलानां सर्वेषां
वः सुमध्यमा। अपृथग्धर्मशीलेयं नृजात्पत्न्यपितात्मजा। १६। दिव्यं वर्षसहस्राणां सहस्रम
त्युत्तमः। तेनामानं तात्तपसो भावान्विदिव्यं श्चानुग्रहान्मम। १७।
प्रजाः सर्गनिमित्तेन मामुद्वहत्यननुवहूनां कथमेका नार्यास्यात्तत्राह। १८। अपृथग्धर्मः शीलं व येषां ते
षां वः पत्नीनृजात्मा अपितोत्तमवृक्षु आशजीयजा। धर्मशीलजोरैक्यात् मध्यमा सा ध्वनद्दक्ष्या दृष्ट्वावि
रोध इति भावः। १९। अहे तोजसः अप्रतिहतबलाः संतः। तेमामात्। दिव्यांश्चतेमागात्। इहस्त्रिता
तो तपसः। २०। प्रचेतसः गुणोदग्धः

व॰री
१३०

पञ्चगुणोदग्धकामादिमलराशयो ये नरास्ते तालोकद्धयजनोगान् निरजप्राजान्निर्विघ्नमत्स्वा
नं प्राप्स्यथानुग्रहेतुप्रविष्टानामस्माकं प्रदास्यत्वावंधएवमस्मात् कुतस्त्वयञ्जनितनिर्वेदो वा। तत्रा
हा ॥७॥ कुशलं मय्यर्पितं कर्म येषां मद्धार्तानां जातो यातः कालो येषां। ननु त्वद्धार्तानां श्रोत्रियाणां गृहे
नैव बाध इति कुतः। तत्राह। ॥७॥ यद्यस्मात् कथाश्रवणात् ज्ञः सर्वज्ञोऽहमीश्वरः ब्रह्मवादिभिः प्रव
श्यथ मय्यनपायिन्या तत्पापकगुणाशया उपजास्य यथमद्धामनिर्विघ्ननिरजादतः॥
॥१९॥ गृहे ह्याविशतां चापि पुंसां कुशलकर्मणां। मद्धार्तांजातु कामानां नैव बाधा जगद्धामतां॥
॥१२॥ न व्यपवत्रहृद्दयेज्ञो ब्रह्मेत ब्रह्मवादिभिः। न मुह्यंति न शोचंति न हृष्यंति येऽलोगताः॥
यर ॥२०॥ १३०

काव्तिनिमित्तन्नरैः श्रोत्रियाणां हृत्स्थहृदयेनव्यावत् प्रतिपदं नूतनवत् उपजप्राप्नोमि। ब्रह्मसा
दात्कारो न भवतीत्यर्थः। ननु त्वत्कथाश्रवणे कथं ब्रह्मसाक्षात्कारः। तत्राह। योऽहं एतदेव ब्रह्मत
त्र हेतुः। यतो गताः यं मां प्राप्ताः संतो मोहशोकहर्षान् न प्राप्नुवंति। अतो मत्कथाश्रवणेन व्य
वन्मद्हृद्यार्जिनो वा तत्त्वस्यैव ब्रह्मसाक्षात्कारवान् गृहेषु वसतामपि न वे बाध इत्यर्थः। ॥७॥
मर

पुरुषार्थेत्ताजयजतिप्राप्यते। तित थातं ।२०। वेदैः सकलश्रेयः साधनत्वेन। निरूपिताउदारागुणा
आढ्यानामा। नियमस्य। मनोवचसोर्वेगाद्दपि पुरोऽग्रतो जवो वेगो यस्य। मनोवचसो रगोचराजे
त्पर्थः। अत एव सर्वेषामन्ताणेंद्रद्विजाणामगैः अगतः अनवगतो ध्वामागोयस्य तस्मै तेनमः।

मे त्रैप्सउवाच॥ एवं ब्रुवाणं पुरुषार्थेत्ताजनं जनार्दनं प्रांजलयः प्रचेतसः तद्दर्शनध्वस्त
रजस्तमोमलाः। गिरागदगदयासुहृत्तमं ।२१। प्रचेतस ऊचुः॥ नमो नमः क्लेशवि
नाशनाय निरूपितोदारगुणाढ्यनाय। मनोवचोवेगपुरोजवाय सर्वोद्गमार्गैरगताध्वनेन
मः। ।२२। स्फुत्स्वाय शांताय नमः स्वनिष्ठ्याय मनस्यपार्थविलसत्ध्वजाय। नमो जगत्स्थान
लयोदयेषु गृहीतमायागुणविग्रहाय ।२३। नमो विष्णुप्रसत्वाय हरये हरिमेधसे वा
सुदेवाय कस्ताय प्रज्ञवेसर्वस्मावतां। ।२४।
मनस्ति निमित्ते स्मति रूपार्थव्यर्थमेवविल
।२०। स्वनिष्ठाय स्वरूपस्थिताय। स्फुत्स्वाय रतः शांताय। मनस्तिनिमित्ते स्मति ।२०। स्वतस्तु विष्णु
सन्स्फुरितं ध्वजं यस्मिन् गृहीता मायागुणैः। विग्रहः ब्रह्मादिमूर्तिर्येन ।२०। सर्वान्तीशप्रदाय॥ ।२०।
ध्वस्य रूपाय। संसारं हरति मेधा ज्ञानं यस्य तस्मै। सर्वतां नकानां प्रज्ञवेस सर्वान्तीशप्रदाय॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

च०टी० १३१ तस्मैनमोयुंक्ष्महि। कृतवंतेअवजंप्यड्डतंवरंद्वाणीध्यमितितिनमनस्तिनिधाप्याहुः भूपमिति ।२५। स
मस्तानांक्लेशानांनाशेनसंक्षयोयस्मात्तेनः आविःकृतंप्रकटितं। क्लिष्टानांकिमनुकंपितं। अनुकंप
अन्नमेवास्माकंपरमोवर इत्यर्थः। कुतइत्यतआह। ।२७। हेभद्ररंधन अमंगलनाशन वं
प्रत्यक्षोत्वनविवक्षितः एतावदेवदीनेषुवत्सलैः प्रभुभिर्ज्ञाव्यं। कार्यं। किंतत्। तदाह। यदन्विति।

नमः कमलनाभाय नमः कमलमालिने। नमः कमलपादाय नमस्ते कमलेक्षण ॥२५॥ न
मः कमलकिंजल्कपिशंगामलवाससे। सर्वभूतनिवासाय नमो युंक्ष्महि साक्षिणे ॥२६॥
रूपं भगवता त्वेतदशेषक्लेशसंक्षयं। आविःकृतं नः क्लिष्टानां किमन्यदनुकंपितं ॥२७॥
॥ एतावद्दे[illegible]वि[illegible]ते ज्ञाव्यं दीनेषु वत्सलैः। यदनुस्मर्यते काले स्वबुद्ध्या भद्ररंधन ॥२८॥
२९। येनोपशांतिर्भूतानां क्षुल्लकानामपीहतां। अंतर्हितोंतर्हृदये कस्मान्नो वेद नाशिषः॥ १३१
॥३०॥

यस्मादीशाएतइति। बुध्याभवितेकाले अनुस्मर्यतेपदाब्जयोरूपमपिदर्शितमितिभावः। /3/
।२८। येनानुस्मरणेनस्मृतानांतेषांउपशांतिः सुखंभवति। किंच। क्षुल्लकानामपिभूतानांअं
तर्हृदये अंतर्हितः अंतर्यामित्वेनस्थितोभवान्। ईहतांइच्छतांवडुपासकानांनोस्माकं
आशिषःकस्मान्नवेद। जानात्येवेत्यर्थः। तथापिवक्तव्यंचेत्
नहि। ।२९।

अस्माकं भगवान् प्रसन्नः अस्तावेव वरः। तावत्त्वत्प्रसादादेवास्माकमीप्सितो वर इत्यर्थः। अपवर्गागु
रूमीदामोर्गाप्रदर्शकः। गतिः स्वतश्च पुरुषार्थभूतः॥ टी॥ यद्यप्येवं तथापि हे नाथ वरं त्वत्तः वरमे
कं वृणीमहे। कथं त्वत्तान् परतः कारणादपि परात्। अपरादप्यपरतः पर इति श्रुतेः। अतो यद्यपि त्वं
दातुं समर्थः। न यद्दत्तानां तद्विभूतीनां अंतोस्ति। यतो ऽनंतविभूतिर्यादनंत इति गीजसे॥ टी॥

अस्तावेव वरोऽस्माकमीप्सितो जगतः पते। प्रसन्नो भगवान् येषामपवर्गगुरुर्गतिः २०॥
वरं वृणीमहे थापि नाथ त्वत्परतः परात्। नह्यंतस्त्वद्विभूतीनां योऽनंत इति गीयसे॥ २१॥
पारिजातं जसा लब्ध्वा सारंगोऽन्यं न सेवते। त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि।
२२॥ यावन्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः। तावद्भवत्प्रसंगानां संगः स्यान्नो भवे
भवे। २३॥

यथा सारंगो भ्रमरः पारिजातं सुखेन लब्ध्वा सति सुलभमपि अन्यद्वृक्षांतरं न सेवते। तथा वयमपि
साक्षात्त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहे। न किंचिदित्यर्थः। यद्वा किमप्यन्यत्तुच्छं किं किं समर्थं
वृणीमहे। यद्वा यदि वृणीमहे तर्हि किं किं वृणीमहे। अनंतत्वेन मनोरथानामनवस्थानादित्य
र्थः। अतः एतावदेव प्रार्थयामहे इत्याहुः यावदिति॥ टी॥ भवतिवपिप्रकृष्टः संगो येषां तेषां
संगोऽस्माकं स्यात् ननु राज्यभोगान् स्वर्गापवर्गौ वा विहाय किमिदं प्रार्थ्यते नत्राह॥ टी॥

भ.टी
१३२

भगवत्संगिनांसंगस्यलवेनस्तोकमात्रकालेनापिनस्वर्गंअपुनर्भवंमोक्षंवनतुलयामे
तिमर्त्यानामाशिषःश्चेष्टंप्रपंवजतित्रिनिःयत्रेति॥छ॥ यत्रयेषुयतः यासु यः कथासुःनिर्वैरविरोधाना
वः॥छ॥ यत्रयासुकथासु॥छ॥ तेषांभागवतानांपद्भ्यांपावनेछयाविवरतांसंसाराद्भीतस्यता
तुलयामलवेनापिनस्वर्गंनापुनर्भवं।भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः॥१४॥
यत्रेड्यंतेकथामृष्टास्तृष्णायाःप्रशमोयतः।निर्वैरंयत्रभूतेषुनोद्वेगोयत्रकश्चन॥१५॥
यत्रनारायणःसाक्षाद्भगवान्न्यासिनांगतिः।संस्तूयतेसत्कथासुमुक्तसंगैःपुनःपुनः।
॥१६॥तेषांविवरतांपद्भ्यांतीर्थानांपावनेछया।भीतस्यकिन्नरोचेततावकानांसमागमः
॥१७॥वयंतुसाक्षाद्भगवन्भवस्यप्रियस्यसख्युःक्षणसंगमेन।सुदुश्चिकित्स्यस्यभ १३२
वस्यमृत्योःभिषक्तमंत्वाद्यगतिंगताःस्म॥१८॥ यन्नःस्वधीतंगुरवःप्रसादिताविप्राश्च
वृद्धाश्चसदानुवृत्त्या।आर्यानताःसुहृदोभ्रातरश्चसर्वाणिभूतान्यनुसूययैव॥१९॥ 132

वकानांसमागमःकथंनरोचेत॥छ॥ तवयःप्रियःसखातस्यभवस्य।अतएवंतंभवंचिकित्सस्य
भवस्यजन्मनोमृत्योश्चभिषक्तमंसद्वैद्यंत्वांगतिंप्राप्ताःस्मतत्संगमफलमस्मात्तिरेवानु
भूतमितिभावः।वरांतरंवृणुतेकल्पं॥छ॥ नमानमस्कृता॥छ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निरंधसांनिरन्नानांअदन्नंबहुकालंतेपरितोषेणजन्तवल्पितिवृणीमहे।अज्ञानामप्यस्माकंत्व
त्स्तुतिर्नापुष्कलेत्याह॥ ।टी।। यस्यतदमहिम्नोनदृष्टंपारंयैःतेपिब्रह्माआत्मसमंस्वशक्त्यानुरूपंस्तु
वंति।अथोअतःवयमपितथागृणीमः ।टी।। समायसदृशमूर्त्तयेवासुदेवाय ।टी।। यानंप्रयाणं
यस्मिन्‌स्तुतत्वेतपएतदीशानिरंधसांकालमदन्नमप्सु।आर्वतदेतत्पुरुषस्यभूम्नोवृणीमहे
तेपरितोषणाय।४०।मनुःस्वयंभूर्भगवान्भवश्चयेन्येतपोज्ञानविशुद्धसत्वाः।अदृष्ट
पाराअपियन्महिम्नःस्तुवंत्यथोत्वात्मसमंगृणीमः।४१।नमःसमायशुद्धायपुरुषाय
परायचवासुदेवायसत्वायतुभ्यंभगवतेनमः।४२।मैत्रेयउवाच॥ ॥इतिप्रचेतोभिरभि
ष्टुतोहरिःप्रीतस्तथेत्याहशरण्यवत्सलः।अनिच्छतांयानमतृप्तचक्षुषांययौस्वधामा
नपवर्गवीर्यः।४३।अथनिर्याययसलिलात्प्रचेतसउदन्वतः।वीक्ष्याकुप्यन्द्रुमैःछन्नां
गांगांरोद्धुमिवोच्छ्रितैः॥४४॥

अनिच्छतामपिसतांस्वधामययौ।अनपवर्गवीर्यः अकुंठितप्रभावः।टी।उदन्वतःसिंधोः
सलिलान्निर्यायनिर्गत्यगांस्वर्गंरोद्धुमिवोच्छ्रितैःद्रुमैर्गांमहीं छन्नांवीक्ष्यद्रुमेभ्यो
कुप्यन्।तदाहिप्राचीनबर्हिषिःप्रव्रजितत्वात्अराजकेकर्षणाद्यभावात्द्रुमैर्भूमिःछन्ना
अभूत्॥ ।टी।

ह.टी. १२२

निर्वीरुधां निरस्तां वीरुधो यस्याः तां निर्वृत्तां कर्तुं संवर्तकः कालाग्निरुद्रः ।६। नद्यैर्मुक्तिभिः
तान्मुक्तीरात् ।७। उडुराट् सम्मर्पिणामासु ।८। मारिषां वार्क्षीं अजनत् योनिर्ब्रह्मा तस्माज्जातो
ततोग्निमारुतौ राजन् अमुंचन् मुखतो रुषा । महीं निर्वीरुधां कर्तुं संवर्तक इवात्यये ।
।४५। तपसा क्षयमाणांस्तान् द्रुमान्वीक्ष्य पितामहः । आगतः शमयामास पुत्रान्
वर्हिष्मतो नजेः ।४६। निर्दग्धुं वेर्नूं द्रुहेः किं वो विरमध्वं द्रुमणा लवः । प्रजानां पालकाः पूर्वं न
वैद्योच्छित्तिकारकाः ।४७। ब्रह्मणो वचनं तत्र वै क्रोधमुत्सृज्य निर्वृत्ताः । सर्वक्रतुतेषु तिष्ठतं ज्ञा
चानाराजणं हृदि ।४८। तत्रावशिष्टाये ये वृक्षास्तानीता कुहितिरं तदा । उडुराजस्ते प्रचेतान्यः उ
पदिष्टाः स्वयंभुवा ।४९। ते वै ब्रह्मण आदेशात् मारिषामुपजेमिरे । यस्यां महद्दवक्त्रा
नादजन्यजनयोनिजः ।५०। वाच्युभेद्यं तरिप्राग्निप्राक्सर्गो कालविद्रुतो यः सस्सर्ज प्रजा
इमाः सदक्षो देवचोदितः ।५१। यो जायमानः सर्वेषां तेजस्तेजः स्मादत्तस्विनां रुचा स्व
जोपयादत्त दाद्दाश्च कर्मणा दक्षमब्रुवन् ।५२।
दक्षः महतः श्रीमद्देवस्यावज्ञानात्पूर्वं प्रजनयोनिजो ब्रह्मपुत्रोपि सन् दशप्रचेतोभ्यो जातो यस्या
मजनि जातः ।५०। प्राक्सर्गो पूर्वदेहे कालेन विद्रुते मृते । दैवेन ईश्वरेण चोदितः प्रेरितः सन् इ
माः प्रजाः ससर्ज स दक्ष इति प्रसिद्धः । स्वजास्य चाप्रजानां तेजः उपादत्त । आच्छादितवान् । यं
वकर्मदादाति दक्षमब्रुवन् ।५२।

प्रवेशो बाब २

१२२
13

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमभिषिच्य अनादिर्ब्रह्माप्रजासर्गरक्षायांयुयोजतामेवंदक्षः अनन्यान्मरीच्यादीन् तत्तद्व्यापा
रेषुनियुक्तवान् ।५२। इतिचतुर्थेप्राचेतस° एकत्रिंशेसुतेदक्षेधुरंन्यस्यवनेस्ततांनारदोक्तेनमा
र्गेणमुक्तिरुक्ताप्रचेतसां १ ततः दिव्यवर्षसहस्राणामूर्ध्वंतेदशलक्षवर्षान्तेउत्पन्नविवेक
ज्ञानास्तेउपायास्यधर्मस्थामनिर्विघ्ननिष्पादतः। इत्यधोक्षजभाषितंस्मरतः आशुप्राव्रजन्।

तंप्रजासर्गरक्षायामनादिरभिषिच्यतं युयोजयुयुजेन्यांश्चसवैसर्वप्रजापतीन् ५२
इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेप्राचेतसिदक्षोत्पत्तिर्नामत्रिंशोध्यायः ॥मैत्रेयउ० ॥
ततउत्पन्नविज्ञानाआश्वधोक्षजभाषितं [illegible]
स्मरंतआत्मजेभार्यांविसृज्यप्राव्रजन्गृहात् ।१। दीक्षिताःब्रह्मसत्रेणसर्वभूतात्म
मेधसा। प्रतीच्यांदिशिवेलायांसिद्धोऽभूद्यत्रजाजलिः ।२। तान्निर्जितप्राणमनोवचो
दृशोजितासनान्शांतसमानविग्रहान्। परेमलेब्रह्मणियोजितात्मनःसुरासुरेड्योददृ
शेस्मनारदः ।३।

।१। ब्रह्मसत्रेणआत्मविमर्शनेदीक्षिताःकृतसंकल्पाबभूवुः। सर्वेषांभूतात्मेतिमेधाज्ञानंयस्मिन्।
तेनाक्षवेलायांसमुद्रतटेजाजलिर्नामऋषिर्यत्रसिद्धोऽभूत् ।२। निर्जिताःप्राणमनोवाचो
दृशोयैः तान्शांताउपरतासमानमूलाधारादारभ्यऋज्वोविग्रहायेषां। ब्रह्मणियोजितःआ
त्मायैः सुरासुरैरीड्योनारदःतान्ददृशवान् ।३।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वरी· उत्थायतंप्रणिपत्ययथादेशं।यथाविधिपूजयित्वाऽब्रुवुः।३।। आदिष्टंउपदिष्टंयदात्मतत्त्वं
१२४ तद्गृहेक्षपितंविस्मृतं।३।। प्रचेतसोऽभिः एवंपृष्टःसन्नारदोऽब्रवीत्।३।। होग्रुप्रसक्ता
हरिसेवांविनासर्वंआयुर्जन्मकर्मादिकंव्यर्थंकृतमितितान्शोचन्नाह।तज्जन्मेतिचतुर्भिः।य
तोजन्मादेर्हरिसेवैवफलं।अतस्तद्विहीनंसर्वंजन्मकर्मादिकंव्यर्थमित्यर्थः।३।। श्रुत्वमा
श्रीभा~ तमागतंतउत्थायप्रणिपत्याभिवंद्यच।पूजयित्वायथादेशंसुखासीनमथाब्रुवन्।
।४।। स्वागतंतेसुरर्षेद्यदिष्ट्यानोदर्शनंगतः।तवचंक्रमणंब्रह्मन्नभयाययथारवेः।
।५।। यदादिष्टंभगवताशिवेनाधोक्षजेनच।तद्गृहेषुप्रसक्तानांप्रायशःक्षपितंप्रभो।
।६।। तन्नःप्रद्योतयाध्यात्मज्ञानंतत्वार्थदर्शनं।येनांजसातरिष्यामोदुस्तरंभवसा.रं।
।७।। मैत्रेयउवाच।। इतिप्रचेतसांपृष्टोभगवान्नारदोमुनिः।भगवत्युत्तमश्लोकेआवि
ष्टात्माब्रवीन्नृपान्।।८।। श्रीनारदउवाच।। तज्जन्मतानिकर्माणितदायुस्तन्मनोवचः।
नृणांयेनहिविश्वात्मासेव्यतेहरिरीश्वरः।।९।। किंजन्मभिस्त्रिभिर्वेहशौक्लसावित्रया
ज्ञिकैः।कर्मभिर्वात्रयीप्रोक्तैःपुंसोपिविबुधायुषा। ।१०।। श्रुतेनतपसावाकिंवचोभिश्चित्त
वृत्तिभिः।बुध्यावाकिंनिपुणयाबलेनेंद्रियराधसा।।११।।
तापितृभ्यामुत्पत्तिःशौक्लंसंबंधिजन्म।उपनयनेनसावित्रंदीक्षयायाज्ञिकं।विबुधानामिवदी
र्घमायुषामपिकिं।३।। वचोभिर्वाग्विलासैः।चित्तवृत्तिभिर्नानावधानसामर्थ्यैः।इंद्रियाणांराधसा
रक्षेनकिं।३।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

योगेन न प्राणायामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण। संन्यासवेदाध्ययनाभ्याम
पि अन्यैरपि व्रततीर्थाटनादिभिः श्रेयःसाधनैः ननु एषां नानाफलसाधनानां हरिसेवया तावन्मा
त्रेण कुतो वैपर्यं तत्राह। ८। श्रेयसां फलानामात्मैव अवधिः पराकाष्ठा। अर्थतः परमार्थतः आ
त्मार्थत्वेनैवान्येषां पृथक्त्वादित्यर्थः। नन्वात्मा अवधिः हरेः किमायातं तत्राह सर्वेषामपीति।
आत्मदः आविद्यानिरासेन स्वरूपाभिव्यंजकः ऐश्वर्येण पितृरूपेण वलिप्रकृतिः आत्म

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि। किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः॥
॥१२॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः। सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः॥
॥१३॥ यथा तरोर्मूलनिषेवनेन तृप्यंति तत्स्कंधभुजोपशाखाः। प्राणोपहाराच्च यथेंद्रियाणां
तथैव सर्वार्हणमच्युतेज्या॥ १४॥

प्रदः प्रियश्च परमानंदरूपत्वात्। किंच नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपि फलानि
हरिप्रीत्या भवंति। केवलं तत्तद्देवताराधनेन तु न किंचिदिति सदृष्टांतमाह। १४। मूलात्प्रथमवि
भागाः स्कंधाः। तद्विभागा भुजाः तेषामपि उपशाखाः। उपलक्षणं पत्रफलादयोऽपि तृप्यंति। ननु
मूलमेकं विना स्वस्वनिषेवनेन प्राणस्योपहारो भोजनं तस्मादिंद्रियाणां तृप्तिः। ननु तत्तदिंद्रि
येषु पृथक्पृथगन्नलेपात्। तथा अच्युताराधनमेव सर्वदेवताराधनं न पृथगित्यर्थः। कुतः स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

च॰टी॰ १२५ यथैववारःजलानिवर्षाकालेसूर्यादुद्भवंतिग्रीष्मेतस्मिन्नेवप्रविशंतिअस्याप्रविशित्वेनदृष्टां
तातरमाह।यथात्मूतानितस्माविंतिगुणप्रवाहः।चेतनाचेतनात्मकःप्रपंचः।नचसंगोहरेरेकथंप्र
पंचोत्पत्तिःतत्राह।।छ॥ अन्तर्तमःप्रकाशात्क्रागमापजिनोरजस्तमःसहस्त्रानीजाःहेतूपाःप्र
चेतसः अमूराक्रमेणतवंति।लीयंते।एवमयंजगत्प्रवाहः॥छ॥ तेनसर्वकारणत्वेनहेतुना।का

यथैवसूर्यात्प्रवर्तंतिवारःपुनश्चतस्मिन्प्रविशंतिकाले।भूतानितद्वैस्थिरजंगमानित
थाहरावेवगुणप्रवाहः॥१५॥ यथानलस्फत्रतेमैःप्रकाशात्तवंतिरूपानतवेतुपक्रमात्।
एवंपरेब्रह्मणिशक्तरूपस्तमूरजस्तमःसत्वमितिप्रवाहः॥१६॥ तेनैकमात्मानमशेषदेहि
नांकालंप्रधानंपुरुषंपरेशं।स्वतेजसाध्वस्तगुणप्रवाहमात्मैकतावेनभजध्वमद्य॥१७॥
दपश्चासर्वभूतेषुस्तंतुष्टापेनकेनवा।सर्वैर्द्विजोपशेनत्पावतुष्पत्पाश्चुजनार्दनः॥१८॥

लोनिमित्तं।प्रधानमुपादानं।पुरुषःकर्ता।एतत्त्रितयात्मकत्वात्सर्वकारणंपरेशं।अस्मान्मादाद्ध
जध्वंकथं।आत्मनाएकभावेनअभिन्नत्वेन।साधनमाह।॥छ॥ दयाहि[illegible]धीर्वेतुष्यति।ततोनक
दाचित्त्यजतीत्याह।॥छ॥ ॥ १२६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नन्किं वजि प्रवहतीमां तत्वेन कुर्वतो। ननु मोक्षं किन्न याचसे ऽत आह येन महत्प्रसंगेन अंजसा अय
त्नतरुग्नकेतरणि व्यसनं नियच्छन्नूत नेष्ये पारं गमिष्यामि भवद्गुणकथैवामृतं तत्पानेन मत्तः सन्नाकु
यामृतपानस्य मादकत्वमाह ॥५॥ तेनेति। ते अतितरां प्रियमपि मर्त्यं देहं न स्मरंति। नानुसंदधते। ये च
मुनादजः अतः मर्त्यं देहे अनुयेतानपि। के ते न स्मरंति। ये कृतप्रसंगाः केषु त्वदीयपादारविंदसौगं

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां। येनांजसोल्बणमुरुव्य
सनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ॥६॥ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः
सुतसुहृद्गृहवित्तदाराः। ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृतप्र
संगाः ॥७॥ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं। रूपं स्थवि
ष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः ॥८॥

धोलुब्धहृदयेषु संतेषु। उशब्देनान्येषां केवलयोगादिनिष्ठानां देहाभिमानानिच्छंति दर्शयति।
नन्वेवं विद्वानपि त्वं किमित्यत्तिमानं वहसि। अत आह तिर्यगिति ॥८॥ तिर्यङ्नगादिभिः परिचितं
व्याप्तं सत्तोऽसत्तस्य विशेषो यस्य। महदादीन्यनेकानि कारणानि परम अज ते इदं स्थविष्ठं वैराजरूपं
केवलं वेद्मि। अतः परं ईश्वरस्य रूपं न वेद्मि। यत्र वादः शब्दव्यापारो नास्ति। तद्ब्रह्मरूपं न वेद्मि अतो
ऽपरं ईश्वरस्य स्वरूपं। अभिमानं न निवर्त्तत इति भावः। तदेव भगवदनुकंपया जातं रूपं दृष्ट्वा ज्ञात्वा ईश्वरस्य
रूपमनुवर्णयन्नमस्करोति ॥८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कल्पांतइति एतत्त्रैलोक्यं यः पुमान् शेते स्वपिति नेमदकेन्द्र ... र्यस्यायोगनिद्राच्छन्दत्वात् अ
नंतसरवः शेषसहायः तदके शेषोत्संगो यस्य सः नारिरव सिंधुः समुद्रः तस्मिन् शेते इति तथा तस्मि
न्कावनलोकप्रसर्गे कल्पिकांतपुमान् तेजस्वी ब्रह्मा भूत्वा तं प्रणतोस्मीत्यर्थः ननु ममापि
स्थापाद्यवस्था वदेको जीवा विशेषः इत्यत आह स्वमिति। ।७। त्वं तु व्यतिरिक्तः जीवविलक्षण एव
अस्येति ... वेलक्षण्यमेवाह त्वं नित्यमुक्तः जीवस्तु त्वत्प्रसादान्मुच्यते त्वं तु परिशुद्धः सतु म
कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान् स्वदृशानंतसरवस्तदंके यन्नाभिसिंधुरुह
कावनलोकपद्मगर्भद्युमान् भगवते प्रणतोस्मि तस्मै। ।८। त्वं नित्यमुक्तपरिशुद्धविशु
आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः यद्बुद्ध्यवस्थितमखंडितया स्वदृष्ट्या द्रष्टासि
तावधिमखो व्यतिरिक्त आस्से ।९। 3५०

लिनः वैविबुद्धः सतु अज्ञः वमात्मासतु जडः। त्वं कूटस्थः सतु विकारी। त्वमनादिः सत्वादिमा
न् त्वं भगवान् सतु नगहीनः त्वं त्र्यधीनां गुणानाम धीशः सतु गुणाधीनः। कुतः एतद्वैलक्षण्यं यद
तः यतः बुध्यवस्थितां बुद्धेस्तां तामवस्थां अखंडितया स्वदृष्ट्या विकुल्याद्रष्टा परस्परं द्रष्टे
ति तत्स्रतपजांतः। अतो बुध्यवस्थितमित्यत्र ... त्वं षष्ठ्यन्तावः। तथा तत एव त्वं स्थितो पालने अ
धिमखः यज्ञाधिष्ठाता श्रीविष्णुः तमेव ब्रह्मरूपेण ज्ञातं नमस्करोमि। ।१०।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अपहृता निरस्ताः सकला ईषणाः कामा यस्मात् । एवंभूतावमल आत्मा मनः तस्मिन् सतां मनसि
निरंतरं एधितप्रवर्धमानप्रेमावनपाननया उपहूतः सन्निधापितः सन् अदूरो हरिः छिद्रवत्
तत्र पाकात्रावत् ततो न सरति नापयाति हि । किं कुर्वन् आत्मनो निजजनवशगत्वं स्वजनाधीन
त्वं अजन् अत्यागं कुर्वन् सतामेवं पश्यो सौ । अपतां पूजामपि न गृह्[illegible]ती त्याह ॥टी॥ कुमनीषिणां

अपहृतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः । निजजनवशगात्वमात्मनोऽ
यन्न सरति छिद्रवदक्षरः सतां हि ॥१९॥ न भजति कुमनीषिणां सइज्यां हरिरधनात्मधनप्रि
योरसज्ञः । श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु ॥२०॥ श्रियमनुवर्त
तीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यः स्वपूर्णः । न भजति निजभृत्यवर्गतंत्रः कथम
मुमुद्विसृजेत्पुमान् कृतज्ञः ॥२१॥

कुत्सितमनीनां दुर्बुद्धीनां पूजां न गृह्णाति । अधनाश्च ते आत्मधनाश्च तजनगायकजनाते प्रियस्तस्यारस
ज्ञः नतिं सुखज्ञः । के कुमनीषिणस्तानाह । श्रुतादिनिमित्तैः मदैः ये सत्सु पापं तिरस्कारं कुर्वंति ।
तत्राधीनत्वं प्रपंचयन्नाह ॥टी॥ अनुवर्तमानामपि श्रियं तदर्थिनः सकामान् द्विपदपतीन् नरेंद्रा
न् विबुधान् देवानपि यो नानुवर्तते । यतः स्वेनैव सुखेन पूर्णः । अतः स्वभृत्यवर्गानुरक्त एवो एवं
भूतममुं ईश्वरमपि कथं परित्यजेत् । कृतज्ञः कृतमुपकारं जानातीति कृतज्ञः ॥टी॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रचेतसः कर्मकृतान् ...स्य नगावत्कथा ... वजित्वा ... लोके॥ नूनं मुनीनामपि पादे ध्रुवचरिता
थाः ... जत ॥२॥ तेपि प्रचेतसः ... विष्णुलोकं ययुः ॥३॥ प्रचेतसां नारदस्य संवादरूपं ए
तत्... नवऽनिहितं कथितं कथं ... वादे हरेः कीर्त्तनं पश्चिमं ॥४॥ यएषउत्तानपा
दस्य वंशः स तु वर्णितः ॥ एतः एष व्रतस्यापि वंशः शृणु कथयामि ॥५॥ यः प्रजव्रतः पूर्वं नारदादा
मे ॥ ...उवाच ॥ इति प्रचेतसो राजन् ...न्यास्थ नगावत्कथाः ॥ श्रावजित्वा व्रह्मलोकं ययौ
स्वायंभुवो मुनिः ॥६॥ तेपि तन्मुखनिर्यातं यशो लोकमलापहं ॥ हरेर्निशम्य तत्पादं ध्या
यंतस्तत्कृतिं ययुः ॥७॥ एवं ते निहितं ... र्यन्मात्वं परिपृष्टवान् ॥ प्रचेतसां नारदस्य सं
वादं हरिकीर्त्तनं ॥८॥ श्रीशुक उवाच ॥ यएषउत्तानपादो मानवस्यानुवर्णितः ॥ वंशं प्रिय
व्रतस्यापि निबोध कथयामि ते ॥९॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीं ॥ भुक्त्वा विभ
ज्य पुत्रेभ्यः ऐश्वरं समगात्पदं ॥१०॥ इमां तु कौरवारविणोपवर्णितां ... निशम्याजितवादसत्
कथां ॥ प्रवृत्ता वाष्पकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः ॥ ॥ श्री विदुर उवाच ॥ सो
... नेन महायोगिन् भवता करुणात्मना ॥ दर्शितः स्तमसः पारो यत्राकिंचनगो हरिः ॥१२॥ इत्यान
म्य तमामंत्र्य विदुरो गजसाह्वयं ॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥१३॥ एतद्यः शृ
णुयाद्राजन् राज्ञां हर्यर्पितात्मनां ॥ आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥ ॥ इति श्री
... चतुर्थस्कंधे ... प्रचेतसां ... एकत्रिं ॥ ३१ ॥
... एवं ... विदुरः ... ॥ स्वान् ज्ञातीन् दिदृक्षुः ॥ राज्ञां चरितमिति त्रिशः ॥ इति चतुर्थे ...

१२६

यथावद्बुद्ध्वा॥ कथंभूतां संस्थां सकलानां जीवनिकायानां धाम आश्रयभूतं वपुः॥ ॥इति पंचमे भावार्थदीपिकायां श्रीधरस्वामिविरचितायां षड्विंशोध्यायः॥२६॥ ॥पंचमस्कंधसंबंधिपदभावार्थदीपनैः॥ प्रीयतां परमानंदनृहरिर्वीलमाधितैः॥ इति श्री श्रीधरस्वामिविर

श्रुत्वा स्थूलं तथा सूक्ष्मं रूपे भगवतो मतिः॥ स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धियानयेदिति॥ भूद्वीपवर्षसरिदद्रिनभः

समुद्रपातालदिङ्नरकभागणलोकसंस्था॥ गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम॥ ॥

॥इति श्रीभागवते महापुराणे पंचमस्कंधे भूगोलवर्णने संस्थानुवर्णने नरकोपवर्णनं नाम षड्विंशोध्यायः॥२६॥ ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्ध मशुद्धं वा मम दोषो न दीयते॥ १ ॥श्री

संवत् १६७३ वर्षे फाल्गुनसुदितिथिपंचमी॥ ॥ ॥ [redacted]

श्रीः
॥श्री॥

[redacted]

भीलाव्रतपंचा... [illegible]
पत्र ८३ पोथी संतामिश्रकी

३५

गम

क नः ॥ चिंतयामास गूढं च तत्वहितो परमं पदं ॥ ५९ ॥ एतत्तु तापपवित्रं च संवादं
पितुपुत्रयोः ॥ सर्वसिमासतः प्रोक्तं नदाप्पातेम हीयते ॥ ६० ॥ यइदं पठते नि
१७ त्यं वाच्यमानो श्रणोतियः ॥ सर्वपापविनिर्मुक्तः स गच्छेत्परमं पदं ॥ ६१ ॥
शुकवाक्यमिदं दिव्यं व्यासेन परिकीर्त्तितं ॥ महापुराणकाराणां व्येनं मुक्ति
भुक्तिफलप्रदं ॥ ६२ ॥ यः श्रणोति शुचिर्भक्त्या तस्य पुण्यफलं श्रृणु ॥ गं
गाकूपसमं पुण्यं गोसहस्रफलं लभेत् ॥ ६३ ॥ ब्रह्महत्या सुरापानं स्तेयं
गुह्यसमागमं ॥ अनंतानंतरांश्चैव परदारेषु मत्सरं ॥ ६४ ॥ गोवधं ब्रह्म
निंदा च वृषलीसेवनं च यत् ॥ इति श्रीमहाभारते शुकसंवादक
संपूर्णं ॥ श्रीशुभमस्तु ॥ संमतु १६१०० वर्षे महा मांगल्यज्येष्ठसुदि १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative